# uchChiShTagaNeshastavarAjaH

# ઉચ્છિષ્ટગણેશસ્તવરાજઃ

## Document Information

Text title : uchchhiShTagaNeshastavarAjaH

File name : uchchhiShTagaNeshastavarAjaH.itx

Category : stavarAja, ganesha

Location : doc_ganesha

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, NA

Description-comments : rudrayaamaletantre haragauriisa.nvaade

Latest update : September 06, 2005, May 2, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2022

*sanskritdocuments.org*

uchChiShTagaNeshastavarAjaH

# ઉચ્છિષ્ટગણેશસ્તવરાજઃ

શ્રી ગણેશાય નમઃ ।

દેવ્યુવાચ ।

પૂજાન્તે હ્યનયા સ્તુત્યા સ્તુવીત ગણનાયકમ્ ।

નમામિ દેવં સકલાર્થદં તં સુવર્ણવર્ણં ભુજગોપવીતમ્ ।
ગજાનનં ભાસ્કરમેકદન્તં લમ્બોદરં વારિભવાસનં ચ ॥ ૧॥

કેયુરિણંહારકિરીટજુષ્ટં ચતુર્ભુજં પાશવરાભયાનિ ।
સૃણિં ચ હસ્તં ગણપં ત્રિનેત્રં સચામરસ્ત્રીયુગલેન યુક્તમ્ ॥ ૨॥ સૃણિંવહન્તં

ષડક્ષરાત્માનમનલ્પભૂષં મુનીશ્વરૈર્ભાર્ગવપૂર્વકૈશ્ચ ।
સંસેવિતં દેવમનાથકલ્પં રૂપં મનોજ્ઞં શરણં પ્રપદ્યે ॥ ૩॥

વેદાન્તવેદ્યં જગતામધીશં દેવાદિવન્દ્યં સુકૃતૈકગમ્યમ્ ।
સ્તમ્બેરમાસ્યં નનુ ચન્દ્રચૂડં વિનાયકં તં શરણં પ્રપદ્યે ॥ ૪॥ નવ ચન્દ્રચૂડં

ભવાખ્યદાવાનલદહ્યમાનં ભક્તં સ્વકીયં પરિષિઞ્ચતે યઃ ।
ગણ્ડસ્રુતામ્ભોભિરનન્યતુલ્યં વન્દે ગણેશં ચ તમોઽરિનેત્રમ્ ॥ ૫॥ તમાલનીલમ્

શિવસ્ય મૌલાવવલોક્ય ચન્દ્રં સુશુણ્ડયા મુગ્ધતયા સ્વકીયમ્ ।
ભગ્નં વિષાણં પરિભાવ્ય ચિત્તે આકૃષ્ટચન્દ્રો ગણપોઽવતાન્નઃ ॥ ૬॥

પિતુર્જટાજૂટતટે સદૈવ ભાગીરથીં તત્ર કુતૂહલેન । વિલોક્ય ભાગીરથીં
વિહર્તુકામઃ સ મહીધ્રપુત્ર્યા નિવારિતઃ પાતુ સદા ગજાસ્યઃ ॥ ૭॥

લમ્બોદરો દેવકુમારસઙ્ઘૈઃ ક્રીડન્કુમારં જિતવાન્નિજેન ।
કરેણ ચોત્તોલ્ય નનર્ત રમ્યં દન્તાવલાસ્યો ભયતઃ સ પાયાત્ ॥ ૮॥

આગત્ય યોચ્ચૈર્હરિનાભિપદ્મં દદર્શ તત્રાશુ કરેણ તચ્ચ ।
ઉદ્ધર્તુમિચ્છન્વિધિવાદવાક્યં મુમોચ ભૂત્વા ચતુરો ગણેશઃ ॥ ૯॥ વિધિચાટુવાક્યં

નિરન્તરં સંસ્કૃતદાનપટ્ટે લગ્નાં તુ ગુઞ્જદ્ભ્રમરાવલીં વૈ ।
તં શ્રોત્રતાલૈરપસારયન્તં સ્મરેદ્ગજાસ્યં નિજહૃત્સરોજે ॥ ૧૦॥

વિશ્વેશમૌલિસ્થિતજહ્નુકન્યાજલં ગૃહીત્વા નિજપુષ્કરેણ ।
હરં સલીલં પિતરં સ્વકીયં પ્રપૂજયન્હસ્તિમુખઃ સ પાયાત્ ॥ ૧૧॥

સ્તમ્બેરમાસ્યં ઘુસૃણાઙ્ગરાગં સિન્દૂરપૂરારુણકાન્તકુમ્ભમ્ ।
કુચન્દનાશ્લિષ્ટકરં ગણેશં ધ્યાયેત્સ્વચિત્તે સકલેષ્ટદં તમ્ ॥ ૧૨॥

સ ભીષ્મમાતુર્નિજપુષ્કરેણ જલં સમાદાય કુચૌ સ્વમાતુઃ ।
પ્રક્ષાલયામાસ ષડાસ્યપીતૌ સ્વાર્થં મુદેઽસૌ કલભાનનોઽસ્તુ ॥ ૧૩॥

સિઞ્ચામ નાગં શિશુભાવમાપ્તં કેનાપિ સત્કારણતો ધરિત્ર્યામ્ ।
વક્તારમાદ્યં નિયમાદિકાનાં લોકૈકવન્દ્યં પ્રણમામિ વિઘ્નમ્ ॥ ૧૪॥ વિઘ્નં વિઘ્નનાશનમિત્યર્થઃ

આલિઙ્ગિતં ચારુરુચા મૃગાક્ષ્યા સમ્ભોગલોલં મદવિહ્વલાઙ્ગમ્ ।
વિઘ્નૌઘવિધ્વંસનસક્તમેકં નમામિ કાન્તં દ્વિરદાનનં તમ્ ॥ ૧૫॥

હેરમ્બ ઉદ્યદ્રવિકોટિકાન્તઃ પઞ્ચાનનેનાપિ વિચુમ્બિતાસ્યઃ ।
મુનીન્સુરાન્ભક્તજનાંશ્ચ સર્વાન્સ પાતુ રથ્યાસુ સદા ગજાસ્યઃ ॥ ૧૬॥

દ્વૈપાયનોક્તાનિ સ નિશ્ચયેન સ્વદન્તકોટ્યા નિખિલં લિખિત્વા । દ્વૈપાયનોક્તં સુવિચાર્ય યેન
દન્તં પુરાણં શુભમિન્દુમૌલિસ્તપોભિરુગ્રં મનસા સ્મરામિ ॥ ૧૭॥ સુતમિન્દુમૌલેસ્તમગ્ર્યરૂપં

ક્રીડાતટાન્તે જલધાવિભાસ્યે વેલાજલે લમ્બપતિઃ પ્રભીતઃ ।
વિચિન્ત્ય કસ્યેતિ સુરાસ્તદા તં વિશ્વેશ્વરં વાગ્ભિરભિષ્ટુવન્તિ ॥ ૧૮॥

વાચાં નિમિત્તં સ નિમિત્તમાદ્યં પદં ત્રિલોક્યામદદત્સ્તુતીનામ્ ।
સર્વૈશ્ચ વન્દ્યં ન ચ તસ્ય વન્દ્યઃ સ્થાણોઃ પરં રૂપમસૌ સ પાયાત્ ॥ ૧૯॥

ઇમાં સ્તુતિં યઃ પઠતીહ ભક્ત્યા સમાહિતપ્રીતિરતીવ શુદ્ધઃ ।
સંસેવ્યતે ચેન્દિરયા નિતાન્તં દારિદ્ર્યસઙ્ઘં સ વિદારયેન્નઃ ॥ ૨૦॥

॥ ઇતિ શ્રીરુદ્રયામલતન્ત્રે હરગૌરીસંવાદે
ઉચ્છિષ્ટગણેશસ્તોત્રં સમાપ્તમ્ ॥

Encoded and proofread by Ravin Bhalekar ravibhalekar@hotmail.com, NA

*uchChiShTagaNeshastavarAjaH*

pdf was typeset on January 23, 2022

Please send corrections to *sanskrit@cheerful.com*